শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শঙ্করাচার্য স্বামিশ্রীমহেশ্বরানন্দসরস্বতীৱিরচিতম্

# ॥ শ্রী সঙ্কষ্টমোচনস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী সঙ্কষ্টমোচনস্তোত্রম্ ॥

সিন্দূরপূররুচিরো বলৱীর্যসিন্ধুঃ
    বুদ্ধিপ্রৱাহনিধিরদ্ভুতৱৈভৱশ্রীঃ।
দীনার্তিদাৱদহনো ৱরদো ৱরেণ্যঃ
    সঙ্কষ্টমোচনৱিভুস্তনুতাং শুভং নঃ ॥ **1** ॥

সোৎসাহলঙ্ঘিতমহার্ণৱপৌরুষশ্রীঃ
    লঙ্কাপুরীপ্রদহনপ্রথিতপ্রভাৱঃ।
ঘোরাহৱপ্রমথিতারিচমূপ্রৱীরঃ
    প্রাভঞ্জনির্জযতি মর্কটসার্ৱভৌমঃ ॥ **2** ॥

দ্রোণাচলানযনৱর্ণিতভৱ্যভূতিঃ
    শ্রীরামলক্ষ্মণসহাযকচক্রৱর্তী।
কাশীস্থদক্ষিণৱিরাজিতসৌধমল্লঃ
    শ্রীমারুতির্ৱিজযতে ভগৱান্ মহেশঃ ॥ **3** ॥

নূনং স্মৃতোঽপি দযতে ভজতাং কপীন্দ্রঃ
    সম্পূজিতো দিশতি ৱাঞ্ছিতসিদ্ধিৱৃদ্ধিম্।
সম্মোদকপ্রিয উপৈতি পরং প্রহর্ষং
    রামাযণশ্রৱণতঃ পঠতাং শরণ্যঃ ॥ **4** ॥

শ্রীভারতপ্রৱরযুদ্ধরথোদ্ধতশ্রীঃ
    পার্থৈককেতনকরালৱিশালমূর্তিঃ।
উচ্চৈর্ঘনাঘনঘটাৱিকটাট্টহাসঃ
    শ্রীকৃষ্ণপক্ষভরণঃ শরণং মমাস্তু ॥ **5** ॥

জঙ্ঘালজঙ্ঘ উপমাতিৱিদূরৱেগো
　মুষ্টিপ্রহারপরিমূর্চ্ছিতরাক্ষসেন্দ্রঃ।
শ্রীরামকীর্তিতপরাক্রমণোদ্ধৱশ্রীঃ
　প্রাকম্পনির্ৱিভুরুদঞ্চতু ভূতযে নঃ॥ **6**॥

সীতার্তিদারুণপটুঃ প্রবলঃ প্রতাপী
　শ্রীরাঘৱেন্দ্রপরিরম্ভৱরপ্রসাদঃ।
ৱর্ণীশ্ৱরঃ সৱিধিশিক্ষিতকালনেমিঃ
　পঞ্চাননোঽপনযতাং ৱিপদোঽধিদেশম্॥ **7**॥

উদ্যদ্ভানুসহস্রসন্নিভতনুঃ পীতাম্বরালঙ্কৃতঃ
　প্রোজ্জ্ৱালানলদীপ্যমাননযনো নিষ্পিষ্ট রক্ষোগণঃ।
সংৱর্তোদ্যতৱারিদোদ্ধতরৱঃ প্রোচ্চৈর্গদাৱিভ্রমঃ
　শ্রীমান্ মারুতনংদনঃ প্রতিদিনং ধ্যেযো ৱিপদ্ভঞ্জনঃ॥ **8**॥

রক্ষঃ পিশাচভযনাশনমামযাধি -
　প্রোচ্চৈর্জ্ৱরাপহরণং দমনং রিপূণাম্।
সম্পত্তিপুত্রকরণং ৱিজযপ্রদানং
　সঙ্কষ্টমোচনৱিভোঃ স্তৱনং নরাণাম্॥ **9**॥

দারিদ্র্যদুঃখদহনং শমনং ৱিৱাদে
　কল্যাণসাধনমমঙ্গলৱারণং চ।
দাম্পত্যদীর্ঘসুখসর্ৱমনোরথাপ্তিং
　শ্রীমারুতেঃ স্তৱশতাৱৃতিরাতনোতি॥ **10**॥

স্তোত্রং য এতদনুৱাসরমাপ্তকামঃ
　শ্রীমারুতিং সমনুচিন্ত্য পঠেৎ সুধীরঃ।
তস্মৈ প্রসাদসুমুখো ৱরৱানরেন্দ্রঃ
　সাক্ষাৎকৃতো ভৱতি শাশ্ৱতিকঃ সহাযঃ॥ **11**॥

সঙ্কষ্টমোচনস্তোত্রং শঙ্করাচার্যভিক্ষুণা।
মহেশ্বরেণ রচিতং মারুতেশ্চরণেঽর্পিতম্॥ **12** ॥

॥ শ্রী সঙ্কষ্টমোচনস্তোত্রং সমাপ্তম্॥